श्री विष्णुः अष्टाविंशतिनाम स्तोत्रं

श्री विष्णुः अष्टाविंशतिनाम स्तोत्रं

अर्जुन उवाच |
किं नु नाम सहस्राणि जपते च पुनः पुनः |
यानि नामानि दिव्यानि तानि चाचक्ष्व केशव || 1 ||

श्रीभगवानुवाच |
मत्स्यं कूर्मं वराहं च वामनं च जनार्दनं |
गोविंदं पुंडरीकाक्षं माधवं मधुसूदनं || 2 ||

पद्मनाभं सहस्राक्षं वनमालिं हलायुधं |
गोवर्धनं हृषीकेशं वैकुंठं पुरुषोत्तमं || 3 ||

विश्वरूपं वासुदेवं रामं नारायणं हरिं |
दामोदरं श्रीधरं च वेदांगं गरुडध्वजं || 4 ||

अनंतं कृष्णगोपालं जपतो नास्ति पातकं |
गवां कोटिप्रदानस्य अश्वमेधशतस्य च || 5 ||

कन्यादानसहस्राणां फलं प्राप्नोति मानवः |
अमायां वा पौर्णमास्यामेकादश्यां तथैव च || 6 ||

संध्याकाले स्मरेन्नित्यं प्रातःकाले तथैव च |
मध्याह्ने च जपेन्नित्यं सर्वपापैः प्रमुच्यते || 7 ||

इति श्री विष्णोः अष्टाविंशतिनाम स्तोत्रं |